शिष्याव्रतं चतुर्भेदं तत्र स्त्रीपुरुषा दधुः ॥
तिर्य्यञ्चोऽपि यथाशक्ति नियमेष्ववतस्थिरे ।
देवाः सद्दर्शनस्नानजिनपूजासु रेमिरे ॥
श्रेणिकेन तु यत् पूर्व्वं बह्वारम्भपरिग्रहात् ।
परस्मिन्निक्रमारब्धं नारकायुस्तमक्रमे ॥
तत्तु क्षायिकसम्यक्त्वात् स्वस्थितिं प्रथमक्षितौ ।
प्रापद् वर्षसहस्राणामशीतिं चतुरुत्तराम् ॥
त्रयस्त्रिंशत् समुद्राः क्व क्व चैषमपरास्थितिः ।
अहो क्षायिकसम्यक्त्वप्रभावोऽयमनुत्तरः ॥
अक्रूरो वारिषेणो यो यो भयः स तथापरे ।
कुमारा मातरश्चैषां पराश्चान्तःपुरस्त्रियः ॥
सम्यक्त्वं शीलसद्दानं प्रोषधं जिनपूजनम् ।
प्रतिपद्य विनेमुस्तं जिनेन्द्रं त्रिजगद्गुरुम् ॥
ततः प्रणम्य देवेन्द्रा जिनेन्द्रं स्तोत्रपूर्व्वकम् ।
यथायथं ययुर्युक्ता निजवर्गैर्निजास्पदम् ॥
श्रेणिकोऽपि गुणश्रेणीसुचक्रैरभिरूढ़वान् ।
अभिष्टुत्य जिनं नत्वा प्रविष्टस्तद्धीपुरम् ॥
निःसरद्भिर्विशद्भिश्च सभा जैनी जनोर्म्मिभिः ।
चुक्षोभ क्षुभितैर्वेला नदीपूरैरिवाम्बुधिः ॥
आकीर्णमेव तैर्न्नित्यं सभामण्डलमर्हतः ।
क्षीयते वा कदा स्फीतिं भानुभिर्भानुमण्डलम् ॥
नोदयास्तमितं तत्र ज्ञायते व्रध्नमण्डलम् ।
धर्म्मचक्रप्रभाचक्रप्रभामण्डलरोचिषाम् ॥
तत्र तीर्थकरः कुर्व्वन् प्रत्यहं धर्म्मदेशनम् ।
सेवितः श्रेणिकेनास्य न हि तृप्तिस्त्रिवर्गजा ॥
गौतमश्च समासाद्य तदा तदुपदेशतः ।
सर्व्वानुयोगमार्गेषु प्रवीणः स नृपोऽभवत् ॥
ततो जिनगृहैस्तुङ्गैराज्ञा राजगृहं पुरम् ।
सततमन्तर्वहिश्चाप्यमजस्रं महिमोत्सवैः ॥
कृतः सामन्तसंघातैर्महामन्त्रिपुरोहितैः ।
प्रजाभिर्जिनगेहाढ्यो मगधो विषयोऽखिलः ॥
पुरेषु ग्रामघोषेषु पर्व्वताग्रे ह्यदृश्यत ।
नदीतटवनान्तेषु तदा गृहजिनावली ॥
तिष्ठन्नेव महोदये विघटयन्मोहान्धकारोन्नतिं
प्रागदेशप्रजया विधाय मगधादेशं प्रबुद्धप्रजम् ।
तद्वत्या एषुदेशमध्यमगमन्मध्यन्दिनश्रीधरं
मिथ्याज्ञानहिमान्तकृज्जिनरविर्बोधप्रभा-
मण्डलः ॥”)
कोकिलः । इति हेमचन्द्रः ॥ धनुर्धरः । इति शब्दरत्नावली ॥ एकवीरवृक्षः । इति राजनिर्घण्टः ॥ लक्ष्मणः । यथा,—
“लक्ष्मणञ्च महावीरं पतितं रणभूतले ॥”
अङ्गदादिः । यथा,—
“अङ्गदाद्यैर्महावीरैर्वेष्टितं रुद्ररूपिणम् ॥”
इति तन्त्रसारे हनूमत्कल्पः ॥
हनूमान् स्वयमपि महावीरत्वेन प्रसिद्धः ॥

महावीरा, स्त्री, (महावीर+टाप् ।) क्षीरकाकोली । इति रत्नमाला ॥

महावीर्य्यः, पुं, (महत् विश्वसृष्टये विपुलं वीर्य्यमस्य ।) ब्रह्मा । इति शब्दरत्नावली ॥ (महत् वीर्य्यं तपोबलमस्य ।) बुद्धभेदः । इति त्रिकाण्डशेषः ॥ वाराहीकन्दः । इति राजनिर्घण्टः ॥ (वितथस्य पुत्रभेदः । यथा, भागवते । ९ । २१ । १ ।
“वितथस्य सुतान्मन्योर्वृहत् क्षत्रो जयस्ततः ।
महावीर्य्यो नरो गर्गः संकृतिस्तु नरात्मजः ॥”)
अतिशयबलयुक्ते, त्रि ॥ (यथा, महाभारते । ५ । १७६ । ४६ ।
“ततः किल महावीर्य्यो भीष्मः शान्तनवो नृपान् ।
अधिक्षिप्य महातेजास्त्रिसः कन्या जहार ताः ॥”
विराजः पुत्रः । यथा, विष्णुपुराणे ।२।१।३९।
“नरो गयस्य तनयस्तत्पुत्रोऽभूद्विराट् ततः ।
तस्य पुत्रो महावीर्य्यो धीमांस्तस्मादजायत ॥”)

महावीर्य्या, स्त्री, (महत् वीर्य्यमस्याः टाप् ।) संज्ञा । सा च सूर्य्यपत्नी । इति त्रिकाण्डशेषः ॥ वनकार्पासी । इति शब्दरत्नावली ॥ महाशतावरी । इति राजनिर्घण्टः ॥

महावृहती, स्त्री, (महती वृहती ।) वार्त्ताकी । इति त्रिकाण्डशेषः ॥

महावृक्षः, पुं, (महान् वृक्षः ।) स्नुहीवृक्षः । इति हलायुधः ॥ (यथास्य पर्य्यायः ।
“वज्रवृक्षो महावृक्षः स्नुही स्नुक् सुधा गुड़ा ॥”
यथा, सुश्रुते सूत्रस्थाने ४४ अध्याये ।
“महावृक्षपयःपीतैर्यवागूस्तण्डुलैः कृता ।
पीता विरेचयत्याशु गुड़ेनोत्कारिका कृता ॥”)
वृहद्वृक्षश्च ॥

महावेगः, पुं, (महान् अमोघो दुर्व्वारो वा वेगो यस्य ।) शिवः । इति महाभारते तस्य सहस्रनामस्तोत्रम् ॥ (महान् वेगः ।) अतिजवः । (महान् वेगोऽस्य ।) तद्युक्ते, त्रि ॥ (यथा, महाभारते । १ । १५५ । १२ ।
“विकर्षन्तौ महावेगौ गर्ज्जमानौ परस्परम् ।
पश्य त्वं युधि विक्रान्तावेतौ च नरराक्षसौ ॥”)

महाव्याधिः, पुं, (महांश्चासौ व्याधिश्चेति ।) महारोगः । स तु कुष्ठादिः । यथा,—
“सर्व्वव्याधिविनिर्मुक्तो महाव्याधिविशेषतः ।
पठनात् संप्रयत्नेन्तु जीवन्मुक्तो भवेन्नरः ॥”
इति ब्रह्मयामले गायत्त्रीकवचम् ॥

महाव्याहृतिः, स्त्री, (महती चासौ व्याहृतिश्चेति ।) प्रणवस्वाहायुक्तव्याहृतित्रयम् । यथा । ॐ भूः स्वाहा ॐ भुवः स्वाहा ॐ स्वः स्वाहा । इति भवदेवभट्टः ॥ (यथा, मनौ । २ । ८१ ।
“ओङ्कारपूर्व्विकास्तिस्रः महाव्याहृतयोऽव्ययाः ।
त्रिपदा चैव सावित्री विज्ञेयं ब्रह्मणो मुखम् ॥”)

महाव्रणं, क्ली, (महच्च तद्व्रणञ्चेति ।) दुष्टव्रणम् । नाली घा इति भाषा । यथा,—
“कुर्य्यात् सप्तदशावृत्तं तथाष्टादशकं प्रिये ! ।
महाव्रणविमोचाय विंशावृत्तं पठेन्नरः ॥”
इति तिथ्यादितत्त्वधृतवाराहीतन्त्रवचनम् ॥

महाव्रतं, क्ली, (महच्च तद्व्रतञ्चेति ।) द्वादशवार्षिकव्रतम् । यथा । ‘तेन वधकालादूर्द्ध्वं विंशत्यधिकशतस्य यावदवशिष्टं तावत्परिमाणमहाव्रतानुरूपा धेनवो दातव्याः ।’ इति प्रायश्चित्तविवेके भवदेवभट्टमतम् ॥ शरत्कालीनदुर्गापूजनम् । यथा,—
“महाव्रतं महापुण्यं शङ्कराद्यैरनुष्ठितम् ।
कर्त्तव्यं सुरराजेन्द्र ! देवीभक्तिसमन्वितैः ॥”
इति तिथ्यादितत्त्वधृतदेवीपुराणवचनम् ॥
अरुणोदयकालीनमाघस्नानम् । यथा,—
“वासुदेवं हरिं कृष्णं श्रीधरञ्च स्मरेत्ततः ॥
दिवाकर ! जगन्नाथ ! प्रभाकर ! नमोऽस्तु ते ।
परिपूर्णं कुरुष्वेद माघस्नानं महाव्रतम् ॥”
इति मलमासतत्त्वधृतपद्मपुराणवचनम् ॥
(महाव्रतधारिणि, त्रि । यथा, महाभारते । १३ । ५४ । २१ ।
“ततोऽन्यस्मिन् वनोद्देशे पुनरेव ददर्श तम् ।
कौश्यां वृष्यां समासीनं जपमानं महाव्रतम् ॥”)

महाव्रती, [न्] पुं, (महाव्रतं योगनियमानुष्ठानादिकमस्यास्तीति । व्रत+इनिः ।) शिवः । इति हेमचन्द्रः ।२।१११॥ उरस्कटः । इति त्रिकाण्डशेषः ॥ महाव्रतयुक्ते, त्रि ॥ (यथा, कथासरित्सागरे । ३७ । ५९ ।
“एतच्छ्रुत्वापि सावज्ञास्ते महव्रतिनस्तदा ।
ऊचुर्निश्चयदत्तं ते चत्वारः सहयायिनः ॥”)

महाशक्तिः, पुं, (महत्यः शक्तयः मातृगणादयो महद्वा सामर्थ्यञ्च यस्य ।) कार्त्तिकेयः । इति शब्दमाला ॥ (महती शक्तिः ।) अतिशयपराक्रमः । महतीशक्तिरस्य तद्युक्ते, त्रि ॥

महाशङ्खः, पुं, (महान् शङ्ख इव दृढ़त्वशुभ्रत्वात् ।) मानुषास्थि । संख्याविशेषः । स च दशनिखर्व्वः । ललाटम् । इति मेदिनी । खे, १६ ॥ (महान् महार्हः शङ्खः ।) निधिविशेषः । इति विश्वः ॥ कर्णनेत्रयोर्म्मध्यगतास्थि । यथा,—
“कर्णनेत्रान्तरालास्थि महाशङ्खः प्रकीर्त्तितः ।”
तस्य मालया जपविधिर्यथा,—
“महाशङ्खमयी माला नीलसारस्वते विधौ ।
नृललाटास्थिखण्डेन रचिता जपमालिका ॥
महाशङ्खमयी माला तारात्रिद्याजपे प्रिये ! ।”
इति तन्त्रसारधृतमुण्डमालातन्त्रम् ॥
(महान् शङ्खः ।) वृहच्छङ्खः । यथा,—
“पौण्ड्रं दध्मौ महाशङ्खं भीमकर्म्मा वृकोदरः ।”
इति श्रीभगवद्गीतायाम् १ अध्यायः ॥
(सर्पभेदः । यथा, भागवते । ५ । २४ । ३१ ।
“ततोऽधस्तात् पाताले नागलोकपतयो वासुकिप्रमुखाः शङ्खकुलिकमहाशङ्खश्वेतधनञ्जयधृतराष्ट्रशङ्खचूड़कम्बलाश्वतरदेवदत्तादयो महाभोगिनो महामर्षा निवसन्ति ।”)

महाशठः, पुं, राजधत्तूरः । इति राजनिर्घण्टः ॥ (महांश्चासौ शठश्चेति ।) अतिधूर्त्ते, त्रि ॥

महाशणपुष्पिका, स्त्री, (अल्पं पुष्पं इति अल्पार्थे ङीप् । ततः स्वार्थे कन् स्त्रियां टाप् पूर्व्वस्य ह्रस्वश्च । शणस्येव पुष्पिका यस्याः । महती चासौ शणपुष्पिका चेति ।) वृहच्छणपुष्पी ।